# प्राकृतशब्दाः संस्कृते नानार्थाः ॥

-सं. पं. शीलचन्द्रविजय गणि

छाणीना प्र.श्री कान्तिविजयजी-शास्त्रसंग्रहमां क्र. ७१३नी प्रति, नामे 'प्राकृत शब्दोना संस्कृत अर्थ' एवी छे. २ पत्र छे. संभवतः १७मा शतकनी छे.

मूल १४ प्राकृत गाथाओ छे, ते पर संस्कृत विवरण छे. मूळ बीजी गाथाना "**निन्हणकइणा** भणिज्जंतं" ए सन्दर्भ जोतां 'निन्हण' नामे कोई कवि आ कृतिना कर्ता जणाय छे. आथी विशेष परिचय प्राप्त नथी. ६६ प्राकृत शब्दोना संस्कृत-अनेकार्थो आमां कर्ताए वर्णव्या छे, जे प्रारंभिक अध्येताओने तेमज रचयिता अभ्यासुओने उपयोगी थई पडे तेम छे.

## प्राकृतशब्दाः संस्कृते नानार्थाः ॥

इक्कम्मि पए पयडत्थसंगए बहुलअत्थसंदोहं।

अप्पम्मि व अप्पाणं पिच्छंती भारई जयइ॥ १॥

इक्कं पाययसद्दं सक्कयभेएण बहुविहवियप्पं।

निसुणंतु सुअणसत्था ! **निन्हणकइणा** भणिज्जंतं॥ २॥

**मुणह पउत्तं** एआरहेहि **अहरं** च पंचभेएण।

**अउलं** चिअ पंचविहं **सत्तासं** छव्विहं होइ॥ ३॥

अत्र प्राकृते '**पउत्त**' इति शब्दस्य संस्कृतेन व्याख्यायमानस्यैकादशार्था भवन्ति। यथा-प्रयुक्तं प्रेरितं १। प्रयुक्तः प्रमोहितः२। प्रवुप्तो मन्दः ३। प्रगुप्तोऽविज्ञातस्वरूपः ४। प्रकुप्तोऽतिशयेन कोपाविष्टः ५। प्रवृत्तः कर्तुं प्रस्तुतः ६। प्रोक्तो भणितः ७। प्रपुत्रः पुत्रपुत्रः ८। पदोक्तः पदकथितोऽर्थः ९। पयोक्तः पयसा मिश्रितः १०। प्रोप्तः सूत्रादिविद्धो हारादिः ११। एवमेकादशार्थाः 'पउत्त' शब्दस्य॥

तथा 'अहर' इति पञ्चधा। यथा -अधर ओष्ठाद्यनेकार्थः१। अगृहो गृहरहितः२। अभरो भररहितः ३। अहरं अमहेश्वरं ४। अखरः कोमलः, अरासभः अपटुर्वा इत्ययं पञ्चप्रकारः॥

'अउलः' पञ्चधा। यथा-अतुलोऽपरिमाणः १। अकुलः कुलरहितः २। अगुलः इक्षुविकाराभावः ३। अपुलोऽमहान् ४। अचुलोऽस्निग्धः ५।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं 'सत्तास' इति षोढा। यथा -सत्रासः सभयः १। सप्ताश्वः सूर्यः २। सत्त्वाशो जीवादनः ३। शक्ताश्वो रथः ४। शप्ताश आक्रुष्टाभिलाषः ५। सत्त्वासः शूरः ६। एते षट्॥ इति प्रथमगाथार्थः॥

**सयलो** अट्ठविहाणो सत्तसु भेएसु पयडिओ **सवओ**।

**पययत्ति** सत्तभेओ पंचसु भेएसु **सुइ** सद्दो॥ ४॥

'सयल' इत्ययं संस्कृतेनाष्टधा। यथा-शकलः खण्डः १। सकलं समग्रं २। सदलः सपत्रः सकटको वा ३। सजलं सनीरं ४। सतलं साधारं ५। सचलं सकम्पं ६। सगलः सकण्ठः ७। स्वकल आत्मवर्गग्राहकः ८ इत्यष्टौ॥

'सवय' इति सप्तधा। यथा -स्वपदं स्वस्थानं १। श्रवको दाता २। सव्रतः सानुष्ठानः ३। सव्रजः सगोकुलः ४। सवया वृद्धः समानो वा ५। सवचा वाग्मी ६। सबको बकयुतः ७। एते सप्त॥

'पयय' इति सप्तधा। यथा-पयोजं कमलं १। पयोदो मेघः २। पयोगा नदी ३। पतगः पक्षी ४। पदगः पदातिः ५। प्रकृतं प्रस्तुतं ६। प्रगतः प्रचलितः ७। एते सप्त॥

'सुइ' इति पञ्चधा । यथा - श्रुतिर्वेदाद्यनेकार्थः १। श्रुतिः प्रवाहः २। शुचिराषाढाद्यनेकार्थः ३। शुदिः शुक्लपक्षो लोकप्रसिद्धः ४। शुचिः स्नानं ५। एते पञ्च॥

**'सुरयण'** सद्दो पञ्चसु, छसु भाणिओ **अप्पमाणसद्दो** य।

तह तब्भेओ **अमओ** चउसुं **अणहत्ति** भणियव्वो॥ ५॥

अत्र 'सुरयण ' इति पञ्चधा भवति। यथा-सुरगणो देवसमुदायः १। सुरदनः सुदन्तः २। सुरचनं विशिष्टरचनायुक्तं वस्तु ३। सुरत्नं पद्मरागादि दोषरहितं ४। सुरजनं शोभनरागः ५। एते पञ्च॥

'अप्पमाण' इति षोढा । यथा-अप्रमाणोऽमर्यादाद्यनेकार्थः १। अल्पमानः स्वल्पाहंकारः २। आत्ममान आत्मतुल्यः ३। आप्यमानः प्राप्यमानः ४। अर्प्यमाणो ढौक्यमानः ५। अप्रमाज्ञो महच्छासनः ६।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अमय' इति षोढा। यथा-अमृतं पीयूषं १। अमृगो मृगरहितो देशः २। अमतं अनभीष्टं ३। अमदो मदरहितः ४। अमृजोऽशुद्धः ५। अमयं हरिमयं ६। एवं षट् ।।

'अणह' इति चतुर्धा। यथा-अनखो नखहीनः १। अनघोऽपापः २। अनभोऽशून्यं ३। अनहो बन्धरहितः ४। एवं चत्वारः।।

अट्ठविहो **सज्जत्थो** पंचविहो **सायरत्ति सत्थित्ति**।

चउहा **विज्ज त्ति** पयं तह **सज्झो** होइ तब्भेओ।। ६।।

'सज्जो'ऽष्टधा। यथा-सर्जो रालावृक्षः १। सज्जः प्रह्वः २। सज्यं समारोपितप्रत्यञ्चं धनुः ३। साज्यं सघृतं ४। सद्यस्तत्क्षणं ५। साद्य आदियुक्तः ६। सार्य आर्ययुक्तः ७। षड्जः स्वरविशेषः ८।।

'सायर' इति पञ्चधा। यथा-सादरः सगौरवः १। स्वादरः स्वादुदाता २। सागरोऽब्धिः ३। साकर आकरयुक्तो देशः ४। सातरः सुखदः ५।।

'सत्थि' इति पञ्चधा। यथा-स्वस्तिराशीर्वचः १। शस्तिः शस्त्रागारं शुद्धं वा २ । सक्थिर्जानुः ३। शास्तिदण्डः ४। शास्तिः शाधिः ५।।

'विज्ज' इति चतुर्धा। यथा -वैद्यो भिषक् १। वीर्यं बलं २। वेद्यं ज्ञेयं ३। वीज्यं निर्वाप्यं ४।

'सज्झ' इति चतुर्धा। यथा-सह्यः पर्वतः सहनीयो वा १। साध्यं निष्पाद्यं २। सह्यः सप्रातः ३। साहाय्यं सहायित्वं ४।। इति तुर्यगाथा पर्यायाः।।

**णायं अहयं सवहं अहिमयरं** तह **सहाए** संजुत्तं।

पंच वि पंच पयाय नायव्वा सत्थकुसलेहिं।।७।।

एते 'णाया' दि पञ्चापि पृथक् पृथक् पञ्चार्थाः। यथा-नाकः स्वर्गः १। नागः सर्पाद्यनेकार्थः २। नादः शब्दः ३। न्यायो नीतिः ४। ज्ञातमुदाहरणं अवगतं वा ५ ।।

''अहयं ' पञ्चधा। अहयोऽनश्वः १। अहतोऽप्रहतः २। अथ चेत्यानन्तर्यार्थमयं ३। अभयो निर्भयोऽपि ४। अभगोऽयोनिः ५।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सवह' इति पञ्चधा। यथा-स्वपत स्वापं कुरुत १। शपथः प्रतिज्ञा २। सपथः समार्गः ३। सवहः सवाहनः ४। स्ववध आत्मवधः ५॥

'अहिमयरः' पञ्चार्थो यथा-अधिमकरः समुद्रः १। अहिमकरः सूर्यः २। अहिमचरः सर्पः ३। अभिमतरोऽभीष्टदाता ४। अहिमतरोऽत्युष्णः ५॥

'सहा' इत्ययमपि पञ्चार्थो यथा-स्वाभा स्वदीप्तिः १। सभा परिषत् २। सखा मित्रं ३। स्वधा पितृवधः ४। स्वहा आत्मघातकः ५॥ इति पञ्चमगाथार्थः॥

**आसासत्ति** चउद्धा **आयासं** मुणह तह य तब्भेयं।

**पव्वइओ** तह य च्चिय भणिओ **कुहरत्ति** पंचविहो॥ ८॥

'आसासा' शब्दश्चतुर्धा। यथा-आश्वासः संधारणं १। आशाशं दिशिदिशि २। आश्वास्यं हयमुखं ३। आशास्यमाशंसनीयं ४॥

'आयास' श्चतुर्धा। यथा-आकाशं खं १। आयासः खेदः २। आयाशो आयभोक्ता ३। आदासं दासपर्यन्तं ४॥

'पव्वइय' श्चतुर्धा। यथा -पार्वतिकः पर्वतनिवासी लोकः १। प्रवजितो व्रती २। पर्व इतः सन्धिगतः ३। पर्वदिनो ग्रन्थिच्छिन्नः ४॥

'कुहर' इति पञ्चधा। यथा-कुधरः पर्वताद्यनेकधा १। कुगृहः कुत्सितगृहः २। कुहरो दरी ३। कुभरः पृथ्वीधरः ४। कुखर ईषत्कर्कशरूपः विरूपगर्दभो वा ५। षष्ठगाथापर्यायाः॥

**कइलास कव्वफलिहा वास अहोवाह पत्र सउणा** य।

**कीलालायण**सहिआ एए अ चउव्विहा हुंति॥

'कइलास' श्चतुर्धा। यथा-कैलाशो गिरिः १। कविलासं कवीनां लसनं २। कपिलाशः पिङ्गलाशो देशः ३। कपिलासः कपीनां लसनं ४॥

'काव्यं' कवेर्भावः कर्म वा १। क्रव्यमामिषं २। क[इ]व ब्रह्म यथा ३। कव्यं पैत्रं कर्म ४।

'फलिह' श्चतुर्धा। यथा-स्फटिकः १। परिखा खातिका २। परिघः ३। फलिहो रत्नविशेषः ४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'व्यासो'ऽपि चतुर्धा। यथा-व्यासो मुनिः १। वासो गृहं २। वासो वस्त्रं ३। व्याशो नष्टदिक् ४॥

'अहो'ऽपि चतुर्धा। यथा-अहो आश्चर्ये १। अहर्दिनं २। अथो आनन्तर्ये ३। अधस्तलपर्यायः ४॥

'वाहो'ऽपि चतुर्धा। यथा-वाहोऽश्वाद्यनेकार्थ १। व्याधः २। बाष्पो अश्रुः ३। बाधः पीडा ४॥

'पन्नो'ऽपि चतुर्धा। यथा-पर्णं पत्रं १। पण्यं विक्रेयद्रव्यं २। पण्या वेश्या ३। प्रज्ञा बुद्धि ४॥

'सउणो'ऽपि चतुर्धा। यथा-सगुणो गुणयुक्तः १। शकुनः पक्षी २। सपुनः-सपुरुषः ३। पुनः पुनः स तु न। न पुनर्भवतीत्यर्थः ४॥

'कीलालाअण' इति चतुर्धा। यथा-क्रीडालागनो रतिविषयोत्पादयिता १। कीलालायनो मद्यमार्गो रुधिरमार्गो वार। कीलालादनो राक्षसः ३। कीलालापणं मद्यकरहट्टं ४॥ इति सप्तमगाथापर्यायाः॥

**सवणो** चउप्पयारो **विणय** (विअण)**त्ति मुहेण छव्विह वियप्पो**।

पंचविह **सुत्तसद्दो** तिहि भणिओ कईहिं **वच्छो** अ॥१०॥

'सवणो' पि चतुर्धा। यथा-सव्रणः सक्षतः १। सवनं यज्ञाद्यनेकधा २ श्रवणं श्रोत्राद्यनेकार्थः ३। स्वप्नं निद्रा ४॥

'विअणः' षोढा। यथा-व्यजनं तालवृन्तं १। विजनं एकान्तः। विगणः पक्ष-वर्जः ३। द्विगुणः गुणद्वयं ४। वियणा वेदना ५। द्विजनः जनद्वययुक्तः॥ ६॥

'सुत्त' इति पञ्चधा। यथा -सूत्रं तन्त्राद्यनेकार्थं १। सुप्तः २। सूक्तं ३। सुक्तं मद्यविशेषः ४। सूप्तं सुवापं क्षेत्रं ५॥

'वच्छ' त्रिधा। यथा-वृक्षः १। वक्षः २। वत्सोऽपत्यं वा ज्योतिःप्रसिद्धो वत्सस्तारः ३॥

**कोसिअ-कणिअं कलिआ कुच्छेअय-कइपहू असप्पत्ता।**

**चित्तयरो अहिअजुओ** इक्किक्के चउविहो **सद्दो**॥ ११॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कोसिम' इत्याद्या वेदार्था:॥ 'कोसिअ' क्रोत्सित आक्रुष्टः १। कौशिक उलूकादिः २। कोऽशितः को भक्षितः कोऽतीक्ष्णो वा ३। कोषितो जलशायी ४॥

'कणय' श्चतुर्धा। यथा -कनकं १। कणय आयुधविशेष:२। कनदः कुत्सितनदः ३। कणदः कणदाता ४॥

'कलिका' कुड्मलं १। कलिता लक्षिता २। कलिजा कलौ जाता ३। कलिदा युद्धदायिनी ४॥

'कुच्छेअ'[य] चतु:प्रकारो यथा-कौक्षेयकः खड्गः १। कुच्छेदजः भूविनाशोत्पन्नः २। कूच्छेदको भूविनाशकरः ३। कुच्छेदगो धरां गतः ४॥

'कइ' चतुर्धा। यथा-कवि १। कति संख्यावाची २। कविः धरैडकः ३। कपिर्वानरः ४॥

'पहूअ' श्चतुर्धा। यथा -प्रधूतः-प्रकम्पितः १। प्रभूतं बहु ३। प्रधूपो यक्षधूपादिः ३। प्रधूय इति क्त्वान्तः ४॥

'सपत्त' श्चतुर्धा। यथा -सपत्रः पर्णयुक्तः सवाहनो वा १। सपात्रः सभाण्डः २। स्वप्राप्तः स्वयंग्राहः ३। सर्पत्र उरगत्राता ४॥

'चित्तयर' चित्रकरः चित्राम्बुदो वा १। चित्तचरः कामः २। चित्तदरो मनोभयं ३। चित्रगरो चित्रविषं ४॥

'अहिअ' इति अधिकः १। अहितो विष्णुहितः शत्रुः २। अभिकः कामी ३। अहिजः सर्पजातः ४॥

**पंच पओस-निसायर-गयाहरा पउहरो** अ तब्भेओ।
**पाययसद्दो** अट्ठसु **पहाअरा** इत्थ छब्भेया॥ १२॥

'पओसः' पञ्चधा। यथा-प्रदोषो रजनीमुखादिः १। प्रतोषः परिपुष्टिः २। प्रकोश उत्कृष्टभाण्डागारादिः ३। प्रपोष उत्कृष्टपुष्टिः ४। प्रवोष उत्कृष्टपानं ५॥

'निसायरः' पञ्चधा। यथा-निशाकरश्चन्द्रो हरिद्राकरो हरिद्रोत्पादयिता वा १। निशाचरो रात्रिचरो राक्षसो वा २। निशातरो रात्रौ तरणं ३। निशागरो हरिद्राक्षोरः (दः) ४। निशादरो रात्रिभयं ५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'गयाहर:' पञ्चधा। यथा-गदाधर: १। गदाहरो गदाचौर: २। गताधरो विगतौष्ठ: ३। गजाखरो हस्तिकोमल: ४। गवा वृषभेन आ समन्तात् चरतीति गवाचर:, ईश्वरो वा ५॥

'पओहर:' पञ्चधा। पयोधरो मेघादि: १। पयोहरो वडवाग्निरगस्तिर्वा २। पयोभरो जलौध: ३। पयोगृहं समुद्रादि: ४। प्रगोखरं शोभन गोरसभं ५॥

'पाययो'ऽष्टधा। यथा -प्राकृत इतरजन: १। प्र(प्रा)गतं वर्य(र्या)गमनं २। पातकं अधर्म: ३। पातग: शीघ्रगामी ४। पादग: पदात्यादि: ५। प्रापद: प्रकृष्टज्ञानद: ६। पातजं श्रम: ७। पातयेति क्रिया ८॥

'परयार:' षडर्थो यथा-परदार: परभार्य: कापुरुष: २। परकार: परप्रेरक: २। परचार: परगति: ३। परतार: परोद्धारक: ४। परजार: ५। परगार: परनिगरणं ६॥

'पहायर:' षोढा। यथा-प्रभाकरो रवि: १। प्रभाचरो ज्योतिर्गमनं २। प्रभातर: प्रभातदाता सूर्यादि: ३। प्रभाजर: कान्त्या जीर्ण: ४। प्रभादर: कान्तिभयं ५। प्रभातर: प्रहारद: ६॥

**सरयं सयणं सणयं गयणयरं सहिअ** तहय **सुव्वत्तं।**

**मयणाही सामलया** अट्ठासु इ(वि) पंचहा सद्दो॥१३॥

'सरया'द्या पञ्चार्था:। यथा-शरदृतु: १। शरद: शरखण्डक: शरप्रद: २। सरद: सदन्त: ३। सरको मद्यं ४। सरय: सवेग: ५।

'सयण:' पञ्चधा। शयनं पर्यङ्कादि: १। सजनो जनसहित: २। सदनं गृहं ३। सकणं कणसहितं सशब्दं वा ४। सगण: ससमूह: ५॥

'सणय:' पञ्चधा। सनयो नयसहित: १। सनग: सपर्वत: सवृक्षो वा २। सनत: ३। स्वनद: स्वशब्द: ४। सनक: पूज्यनर: ५॥

'गयणयर:' पञ्चधा। गगनचर: सूर्यादि: १। गतनगरो विपुर: २। गदनतरं प्रकृष्टवच: ३। गतनयरो गतन्यायप्रद: ४। गगनकर: आकाशकर: ५।

'सहिय:' पञ्चधा। सहितो हितयुक्त: १। सखित: सख्यु: २। सखिद: सखिप्रद: ३। स्वहित आत्महित: ४। सखिगो मित्रसहगामी ५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सुव्वत्तं' पञ्चधा। सुवार्त्ता शोभनकथा १। सुव्यक्ता सुप्रकटा २। सुव्याप्ता सुक्रान्ता ३। सुव्यात्ता सुप्रसारिता ४। शुल्बत्रा ताम्ररक्षकः ५।

'मयणाही' पञ्चधा। मृगनाभी १। मदनाभी कामाभयः२। मदनाधिः कामचिन्ता ३। मृतनाभिर्मृततुन्दं ४। मदनाही कामसर्पो ५।

'सामलया' पञ्चार्थः। श्यामलता कृष्णलता कृष्णता वा १। सामलका आमलकसहिता २। सामलया देवविशेषप्रयोगा नीतिप्रयोगा वा ३। सामलता प्रसिद्धा ४। सा मलदा मलं ददाति खण्डयति वा ५॥

**सावय** सद्दो पंचसु तब्भेओ **सच्छरायणो पाओ**।

तह **सुअ सरोअआ** वि हु नायव्वा सत्थकुसलेहिं॥

प्राकृते 'सावयः' पञ्चार्थः। श्वापदोऽरण्यजीवः १। श्रावको जिनभक्तः श्रोता वा २। शापद आक्रोशदाता ३। सापगः सदापानीयो देशः सनदिको वा ४॥

'सच्छरायणः 'पञ्चधा। साप्सरोगणः -अप्सरोगणसहितः १। स्वाक्षरोगणः स्वकेन्द्रियदीपनः २। साक्षरायनः पण्डितगमनः ३। स्वच्छरदनो-स्वच्छदन्तसमूहः ४। स्पप्सरायनं देवमार्गः ५॥

'पायः' पञ्चधा। प्रायो बाहुल्यं १। पादोंऽह्रिश्चतुर्थांशो वा २। पातः पतनं ३। पाकः पचनमन्त्रादेः ४। पापः पाप्मा नरः ५॥

'सुअ' पञ्चधा। यथा-सुतः पुत्रः १। शुकः कीरादिः २। श्रुतं शास्त्रं कर्णाभ्यां पूर्वश्रवणं ३। शुक् शोकः ४। सुदः सुष्ठु दाता ५॥

'सरोअअ' पञ्चधा। सरोजकं कमलं १। सरोगो रोगी तडाकगो वा २। सरोदयो नाडीवायुप्रचारः ३। सरोपकं काण्डजलं ४। सरोचको रुचिकरः पदार्थः ५॥

**इति प्राकृतशब्दाः संस्कृते नानार्थाः॥**

* * *

Jain Education International For Private & Personal Use Only www.jainelibrary.org